# शैक्षिकनिहितार्थानां सन्दर्भे बुद्धेः स्वरूपम्

## (साङ्ख्यदर्शनस्य परिप्रेक्ष्ये)

**डॉ. मनमोहनशर्मा**

वरिष्ठशोधाध्येता, सं.सं.प्र.

### सारांशः

*शोधपत्रेऽस्मिन् साङ्ख्यदर्शनानुसारेण बुद्धेः विविधपक्षाणां शैक्षिकपरिप्रेक्ष्ये विवेचनं विहितम् । प्रस्तावनायां कोशाधारितान् बुद्धेः विविधार्थान् प्रदर्श्य निष्कर्षः प्राप्तः यत् सर्वत्रापि बुद्धिशब्दस्य प्रयोगः प्रायः ज्ञानार्थे कृतः वर्तते । अध्यवसायो बुद्धिः अर्थात् अन्तःकरणे यत् विशिष्टविषयकं निश्चयात्मकं ज्ञानं सा एव बुद्धिः । इति साङ्ख्यदर्शनोक्तार्थं विवेच्य धर्म-ज्ञान-वैराग्य-ऐश्वर्यमिति चत्वारः सात्त्विकभेदाः अधर्म-अज्ञान-अवैराग्य-अनेश्वर्यमिति चत्वारः असात्त्विकभेदाः प्रदर्शिताः । साङ्ख्यदर्शने एतेषां विस्तृतं व्याख्यानं वर्तते । धर्मस्वरूपा सात्त्विकबुद्धिः मानवं सदाचरणाय कर्तव्यपालनाय च प्रेरयति । यया न केवलं विविधानां बाह्यविषयाणां संशयरहितं निर्दुष्टं ज्ञानं भवति अपितु आत्मनि परमतत्त्वस्य अपि अभिज्ञानं कर्तुं शक्यते सा ज्ञानरूपा सात्त्विकबुद्धेः प्रभेदः वर्तते । वैराग्यबुद्धेः यतमानसंज्ञा, व्यतिरेकसंज्ञा, एकेन्द्रियसंज्ञा, वशीकारसंज्ञा इति चत्वारः प्रभेदाः सन्ति । सात्त्विकबुद्धेः वैराग्यप्रभेदे यतमानसञ्ज्ञा एतादृशी बुद्धिः वर्तते, यया छात्राः वैराग्यपूर्वकेण अभ्यासेन कामक्रोधालस्यादीनां निवारणं कृत्वा अपेक्षितेषु स्वाध्यायाध्ययनादिषु कर्मसु प्रवृत्ताः भवन्तीति । यतमानसञ्ज्ञया निवारिते सत्यपि केचन रागाः परिपक्वाः भवन्ति तेषां निवारणं सामान्येन अभ्यासेन नैव भवति । अत एव व्यतिरेकसञ्ज्ञा इत्यनया वैराग्यबुद्धिना अवशिष्टानां रागादीनां निवारणम् अत्यन्तम् आवश्यकं भवति । एकेन्द्रियसञ्ज्ञा इत्यनया वैराग्यबुद्धिना मनसः रागस्य निगूढायाः प्रतिच्छायायाः अपि निवारणं क्रियते, तन्निवारणमपि अभ्यासेनैव साध्यते । यया वैराग्यबुद्धिना प्रत्यक्षाप्रत्यक्षोपभोगान् अथवा रागादीन् प्रति आसक्तिः अथवा तृष्णा सर्वथा नष्टा भवति । सः सात्त्विकबुद्धेः अन्तर्गतं वैराग्यबुद्धेः वशीकारसञ्ज्ञा नामकः प्रभेदः वर्तते । ऐश्वर्यबुद्धिना अणिमा, लघिमा, गरिमा, महिमा, प्राप्तिः, प्राकाम्यम्, वशित्वम्, ईशत्वं चेति अष्टसिद्धीनां साधनं क्रियते । यासां विस्तृतं शैक्षिकं वर्णनं शोधपत्रे कृतमस्ति ।*

### प्रस्तावना

संस्कृतवाङ्मये सर्वेषु प्रमुखेषु दर्शनेषु शास्त्रेषु वा बुद्धिविषयणी चर्चा वर्तते एव । बुद्धेः किं स्वरूपमिति विचारात् पूर्वं तदर्थो विचार्यते । **ज्ञानार्थक-बुध्-धातोः भावार्थे क्तिन् प्रत्यये** कृते सति बुद्धिः इति शब्दो निष्पद्यते, ज्ञानमिति अस्यार्थो भवति । शास्त्रेषु बुद्धिशब्दस्य प्रयोगः अनेकेषु अर्थेषु भवति । बुद्धिशब्दस्य कियन्तः अर्थाः सम्भवन्तीति जिज्ञासायां प्रतिपादितम् अमरकोशे-

**बुद्धिर्मनीषा धीषणा धीः प्रज्ञा शेमुषी मतिः ।**
**प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥**[1]

[1] अमरकोशः १/५/१

**1. बुद्धिः, 2. मनीषा, 3. धिषणा, 4. धीः, 5. प्रज्ञा, 6. शेमुषीः, 7. मतिः, 8. प्रेक्षा, 9. उपलब्धिः, 10. चित्, 11. संवित्, 12. प्रतिपत्, 13. ज्ञप्तिः, 14. चेतना ।** एते चतुर्दश अर्थाः बुद्धिशब्दस्य सम्भवन्ति । एतदतिरिच्य स्मृतिः **(अतिक्रान्तस्य अर्थस्य स्मर्त्री)** प्रज्ञा **(नागतस्य प्रज्ञात्री**[2]) इत्यादयः अपि अर्थाः भवन्ति । अस्माकं काव्यनाटककारैपि बुद्धिशब्दस्य प्रयोगः विभिन्नेषु अर्थेषु कृतः । यथा- **तीक्ष्णा नारुन्तुदा बुद्धिः । शास्त्रेष्वकुण्ठिता बुद्धिः । बुद्धिर्यस्य बलं तस्य । मनमूढः प्रत्ययेनबुद्धिः । दूरात्तमवलोक्य व्याघ्रबुद्ध्या पलायन्ते । अप्राप्तवचनं बृहस्पतिरपि ब्रुवन् बुद्ध्यवज्ञानमपमानञ्च पुष्कलम् ।** एवमेव शब्दकल्पद्रुमे अपि विस्तरेण बुद्धेः विषये उक्तं यथा बुद्धिः, स्त्री, **(बुध्यतेऽनयेति । बुध् + क्तिन् ।) निश्चयात्मिकान्तःकरणवृत्तिः ।**[3]

**१ धारणा २ प्रतिपत्तिः ३ मेधा ४ मननम् ५ मनः ६ ज्ञानम् ७ बोधः ८ हृल्लेखः ९ संख्या १० प्रतिभा**[4] **। आत्मजा, पण्डा, विज्ञानम्**[5] ।

उपर्युक्तेषु पर्यायेषु सर्वत्र बुद्धिशब्दस्य प्रयोगः प्रायः ज्ञानरूपार्थे वर्तते । इयं बुद्धिः तत्तद् दर्शनशास्त्रेषु क्वचित् तत्त्वरूपेण स्वीकृता वर्तते क्वचिच्च गुणरूपेण । सांख्यदर्शने स्वीकृतेषु पञ्चविंशतितत्वेषु बुद्धितत्त्वस्य किं स्वरूपमिति अधुना विचारयामः ।

**अध्यवसायो बुद्धिधर्मो ज्ञानं विराग ऐश्वर्यम् ।**
**सात्त्विकमेतद्रूपं तामसमस्मात् विपर्यस्तम् ॥**[6]

अस्य अयं भावः यत् ***अध्यवसायो बुद्धिः ।*** इदं बुद्धेर्लक्षणम् । अर्थात् कार्येण असम्बद्धं कारणं कार्यं न जनयतीति सिद्धान्तरीत्या यदा ज्ञानेन्द्रिस्य विषयेण सह सम्बन्धो भवति तदा तद्विषयकं ज्ञानं जायते । यथा चक्षुरेन्द्रियस्य सम्बन्धः घटेन सह यदा जायते तदा घटस्य निश्चायात्मकं ज्ञानम् अन्तःकरणे जायते । ***अन्तःकरणे यत् घटविषयकं निश्चयात्मकं ज्ञानं सा एव बुद्धिः ।*** अस्याः बुद्धेः अष्टौ धर्माः चत्वारः सात्विकाः, चत्वारः असात्विकाः। तत्र **धर्मः, ज्ञानम्, वैराग्यम्, ऐश्वर्यमिति सात्विकाः, तद्भिन्नमसात्विकाः यथा अधर्मः, अज्ञानम्, अवैराग्यम्, अनेश्वर्यम् ।**

- **धर्मः अभ्युदयनिःश्रेयसहेतुः । तत्र यागदानाद्यनुष्ठानजनितो धर्मोऽभ्युदयहेतुः । अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतुः ।**[7] इति उक्तं परन्तु धर्मस्य परिधिः अत्यन्तं विस्तृतः वर्तते । प्रसङ्गवशात् शास्त्रेषु धर्मस्य विविधानि लक्षणानि उक्तानि **'स्वकर्मनिरतो यस्तु धर्मः स इति निश्चयः'**[8] **'धर्मस्याख्या महाराज व्यवहार इतीष्यते'**[9] इत्येवं प्रकारेण महाभारते कर्तव्यपरायणता व्यवहारश्च धर्मः इति उक्तम् । अस्य अयम् अभिप्रायः वर्तते यत् मानवैः विविधपरिस्थितिषु यत् उचितं कर्म यश्च व्यवहारः क्रियते स एव तस्य धर्मः । अत एव मनुस्मृतौ आचारः परमो धर्मः इति प्रतिपादितम् ।

**'आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।**

[2] काव्यमीमांसा अ.४
[3] वेदान्त- सारः
[4] राजनिर्घण्टः
[5] शब्दरत्नावली
[6] साङ्ख्यतत्त्वकौमुदी २३
[7] साङ्ख्यतत्त्वकौमुदी २३
[8] महाभारतम् (वनपर्वणि) २०८/९
[9] महाभारतम् (शान्तिपर्वणि) १२१/९

**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः'** [10]

मनुना धर्मस्य दशलक्षणानि उक्तानि तानि सर्वाणि मानवव्यहारेण एव सम्बद्धानि सन्ति।

**'धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥'** [11]

| | | |
|---|---|---|
| धृतिः | = | **धैर्यम् अथवा 'सन्तोषो धृतिः'**[12] |
| क्षमा | = | **'परेणाऽपकारे कृते तस्य प्रत्यपकाराऽनाचरणं क्षमा'**[13] |
| दमः | = | **'विकारहेतुविषयसन्निधानेऽप्यविक्रियत्वं मनसो दमः'**[14] |
| अस्तेयम् | = | **'अन्यायेन परधनादिग्रहणं स्तेयं तद्भिन्नमस्तेयम्'**[15] |
| शौचम् | = | **'यथाशास्त्रं मृज्जलाभ्यां देहशोधनं शौचम्'**[16] |
| इन्द्रियनिग्रहः | = | **'विषयेभ्यश्चक्षुरादिवारणमिन्द्रियनिग्रहः'**[17] |
| धीः | = | **'शास्त्रादितत्त्वज्ञानं धीः'**[18] |
| विद्या | = | **'आत्मज्ञानं विद्या'**[19] |
| सत्यम् | = | **'यथार्थाऽभिज्ञानं सत्यम्'**[20] |
| अक्रोधः | = | **'क्रोधहेतौ सत्यपि क्रोधाऽनुत्पत्तिरक्रोधः'**[21] |

एते धृत्यादयः सदाचरणस्य साधकाः कर्तव्याकर्तव्यस्य निर्धारिकाः च भवन्ति। तथैव **अष्टाङ्गयोगानुष्ठानजनितश्च निःश्रेयसहेतवः 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यान-समाधयोऽष्टावङ्गानि'**[22] अपि सदाचारयुक्तं व्यवस्थितं च जीवनं व्यापयितुम् एव प्रतिपादितानि। अतः वक्तुं शक्यते यत् धर्मस्वरूपा सात्त्विकबुद्धिः मानवं सदाचरणाय कर्तव्यपालनाय च प्रेरयति। अतः उक्तं **चोदनालक्षणोऽर्थो धर्मः**[23] यः यथार्थं प्रति प्रेरयति न तु अनर्थं प्रति इति सः धर्मः स एव सात्त्विकबुद्धेः प्रभेदः।

- **गुणपुरुषान्यताख्यातिर्ज्ञानम्**[24] अर्थात् सत्त्वरजस्तमांसि इत्येतैः त्रिगुणैः अनाच्छादितस्य शुद्धपुरुषस्य अभिज्ञानम्। लोके तु संशयरहितं निर्दुष्टं विषयज्ञानम् इति अर्थः भवितुमर्हति। साङ्ख्यकारिकायाः गौडपादभाष्ये ज्ञानस्य भेदं प्रतिपादियन्

[10] मनुस्मृतिः १/१०८
[11] मनुस्मृतिः ६/९२
[12] तत्रैव (व्याख्या)
[13] मनुस्मृतिः ६।९२ (व्याख्या)
[14] तत्रैव
[15] तत्रैव
[16] तत्रैव
[17] तत्रैव
[18] तत्रैव
[19] तत्रैव
[20] तत्रैव
[21] तत्रैव
[22] पातञ्जलयोगदर्शनम् (समाधिपादः) २९
[23] मीमांसादर्शनम् १/१/२
[24] साङ्ख्यतत्त्वकौमुदी २३

ज्ञानस्य पर्यायाः अपि उक्ताः यथा **ज्ञानं, प्रकाशः, अवगमः, भानमिति पर्यायाः । तच्च द्विविधम् । बाह्यमाभ्यन्तरं चेति । तत्र बाह्यं नाम वेदाः शिक्षा - कल्प - व्याकरण -निरुक्तच्छन्दोज्योतिषाख्यषडङ्गसहिताः पुराणानि, न्यायमीमांसाधर्मशास्त्राणि चेति । आभ्यन्तरं प्रकृतिपुरुषज्ञानम् । इयं प्रकृतिः सत्त्वरजस्तमसां साम्यावस्था, अयं पुरुषः सिद्धो निर्गुणो व्यापी चेतन इति ।** [25] अतः इदं वक्तुं शक्यते यत् यया न केवलं विविधानां बाह्यविषयाणां संशयरहितं निर्दुष्टं ज्ञानं भवति अपितु आत्मनि परमतत्त्वस्य अपि अभिज्ञानं कर्तुं शक्यते सा ज्ञानरूपायाः सात्त्विकबुद्धेः प्रभेदः वर्तते ।

- अधुना वैराग्यरूपायाः सात्त्विकबुद्धेः विषये विचारयामः तदुक्तं साङ्ख्यतत्त्वकौमुद्यां **विरागो वैराग्यं रागाभावः । तस्य**
  - **यतमानसञ्ज्ञा**
  - **व्यतिरेकसञ्ज्ञा**
  - **एकेन्द्रियसञ्ज्ञा**
  - **वशीकारसञ्ज्ञा इति चतस्रः सञ्ज्ञा ।** [26]

* **यतमानसञ्ज्ञा - 'रागादयः कषायाश्चित्तवर्तिनः, तैरिन्द्रियाणि यथास्व विषयेषु प्रवर्त्त्यन्ते । तन्मा प्रवर्तिषत विषयेष्विन्द्रियाणीति तत्परिपाचनयारम्भः प्रयत्नो यतमानसञ्ज्ञा ।'**[27] अस्य अयम् अभिप्रायः यत् रागद्वेषादयः चित्ते अथवा मनसि स्थिताः भवन्ति । तैः एव इन्द्रियाणि अनपेक्षितेषु विषयेषु आसक्ताः भवन्ति । एतेषां रागादीनां मनसः निवारणं वैराग्यबुद्धेः प्रभेदस्य 'यतमानसञ्ज्ञायाः' प्रमुखं कार्यं भवति । यदि शिक्षण-सन्दर्भे विचारयामः तर्हि काम-क्रोध-लोभ-मोह-ईर्ष्या-अहङ्कार-आलस्य-निरुत्साह-तन्द्रा-व्यसनादयः रागत्वेन छात्राणां मनसि स्थिताः भवन्ति । येन छात्राणाम् इन्द्रियाणि स्वाध्यायाध्ययनाद् अतिरिक्तेषु अनपेक्षितविषयेषु प्रवृत्तानि भवन्ति । अनया यतमानवैराग्यबुद्धिना कामक्रोधरागादीनां निवारणं कृत्वा छात्राणाम् इन्द्रियाणि अपेक्षितेषु स्वाध्यायाध्ययनसदृशेषु विषयेषु प्रवृत्तानि कर्तुं शक्यन्ते । '**अभ्यासवैराग्याभ्यां तन्निरोधः**'[28] इत्यनेन सूत्रेण भगवता पतञ्जलिना संकेतितं यत् अभ्यासेन वैराग्येण च तन्निरोधः अर्थात् रागादीनां चित्तवृत्तीनां निवारणं कर्तुं शक्यते । '**तत्र स्थितौ यत्नोऽभ्यासः**'[29] सूत्रेऽस्मिन् अभ्यासस्य अर्थः स्पष्टीकृतः यत् मनसः स्थिरतायैः यः यत्नः क्रियते स एव अभ्यासः इति ।'**प्रयत्नो यतमानसञ्ज्ञा**' तथा '**यत्नोऽभ्यासः**' इत्यनयोः सारः अयमेव यत् सात्त्विकबुद्धेः वैराग्यप्रभेदे यतमानसञ्ज्ञा एतादृशी बुद्धिः वर्तते, यया छात्राः वैराग्यपूर्वकेण अभ्यासेन कामक्रोधालस्यादीनां निवारणं कृत्वा अपेक्षितेषु स्वाध्यायाध्ययनादिषु कर्मसु प्रवृत्ताः भवन्तीति।

* **व्यतिरेकसञ्ज्ञा - 'परिपाचने चानुष्ठीयमाने केचित् कषायाः पक्वाः, पक्ष्यन्ते च केचित्, तत्रैव पूर्वापरीभावे सति पक्ष्यमाणेभ्यः कषायेभ्यः पक्वानां व्यतिरेकेणावधारणं व्यतिरेकसञ्ज्ञा ।'**[30] अर्थात् यतमानसञ्ज्ञया निवारिते सत्यपि केचन रागाः परिपक्वाः भवन्ति। तेषां निवारणं सामान्येन अभ्यासेन नैव भवितुम् अर्हति यतो हि केचन रागादयः

[25] साङ्ख्यकारिका (सगौडपादभाष्यम्) २३
[26] साङ्ख्यतत्त्वकौमुदी २३
[27] साङ्ख्यतत्त्वकौमुदी २३
[28] पातञ्जलयोगदर्शनम् (समाधिपादः) १२
[29] पातञ्जलयोगदर्शनम् (समाधिपादः) १३
[30] साङ्ख्यतत्त्वकौमुदी २३

स्वप्रतिच्छायां परित्यजन्ति । कालान्तरेण सा प्रतिच्छाया एव परिपक्वा भवति । पुनश्च तेषां निवारणम् अत्यन्तं कठिनं जायते। तदर्थं वैराग्यबुद्धेः द्वितीयप्रभेदः व्यतिरेकसञ्ज्ञा इति उक्तः । उपरोक्तविवरणानुसारेण रागस्तु द्विधः क्षीणः अक्षीणश्च । व्यतिरेकसञ्ज्ञया तेषाम् अक्षीणरागाणां निर्धारणं कृत्वा तेषां निवारणाय प्रयत्नाः क्रियन्ते । सामान्योदाहरणेन स्पष्टतया अवगन्तुं प्रयत्नं कुर्मः – केनचित् छात्रेण ब्रह्ममुहूर्ते जागरणस्य निश्चयः कृतः । वैराग्यबुद्धेः यतमानसञ्ज्ञायाः साहाय्येन सः छात्रः निद्रायाः सम्बद्धानां रागादीनां निवारणं कृत्वा ब्रह्ममुहूर्ते जागरणं कृतवान् । तथापि आलस्यं, शैथिल्यं, तन्द्रादयः रागाणां प्रतिच्छायारूपेण अथवा साक्षादवशिष्टरागत्वेन आगत्य ब्रह्ममुहूर्ते जागरितस्य छात्रस्य निश्चयात्मिकायाः बुद्धेः नाशं कुर्वन्ति। अत एव व्यतिरेकसञ्ज्ञा इत्यनया वैराग्यबुद्धिना अवशिष्टानां रागादीनां निवारणम् अत्यन्तम् आवश्यकं भवति।

* **एकेन्द्रियसञ्ज्ञा - 'इन्द्रियप्रवर्त्तनासमर्थतया पक्वानामौत्सुक्यमात्रेण मनसि व्यवस्थापनमेकेन्द्रिसञ्ज्ञा'**[31] अस्य अयम् अभिप्रायः यत् यदा व्यतिरेकसञ्ज्ञया मनसि स्थितानाम् अवशिष्टरागादीनां निवारणं क्रियते । तदा ते रागादयः इन्द्रियाणां प्रवर्तने असमर्थाः भवति । तथापि तेषां तेषां रागादीनां प्रतिच्छाया उत्सुकतारूपेण मनसि निगूढा भवति । कालान्तरे सैव निगूढा प्रतिच्छाया दृढीभूय रागत्वेन इन्द्रियाणां प्रवर्तनं कर्तुं समर्था भवति । अत एव एकेन्द्रियसञ्ज्ञा इत्यनया वैराग्यबुद्धिना मनसः रागस्य निगूढायाः प्रतिच्छायायाः अपि निवारणं क्रियते तन्निवारणमपि अभ्यासेनैव साध्यते।

* **वशीकारसञ्ज्ञा - औत्सुक्यमात्रस्यापि निवृत्तिरुपस्थितेष्वपि दृष्टानुश्रविकविषयेषु या सञ्ज्ञात्रयात् पराचीना सा वशीकारसञ्ज्ञा । यामत्रभवान् पतञ्जलिर्वर्णयाञ्चकार**[32] – **'दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसञ्ज्ञा वैराग्यम्'**[33] **इति ।** सूत्रेऽस्मिन् अन्तःकरणेन इन्द्रियैः च प्रत्यक्षानुभूताः लौकिकोपभोगाः 'दृष्टः' इत्यनेन पदेन अभिहिताः तथा च अप्रत्यक्षानुभवाः 'आनुश्राविकः' इत्यनेन पदेन कथिताः । येन वैराग्यबुद्धिना प्रत्यक्षाप्रत्यक्षोपभोगान् अथवा रागादीन् प्रति आसक्तिः अथवा तृष्णा सर्वथा नष्टा भवति । सः सात्त्विकबुद्धेः अन्तर्गतं वैराग्यबुद्धेः वशीकारसञ्ज्ञा नामकः प्रभेदः वर्तते । अस्मिन् विषये यदि शैक्षिकसन्दर्भमधिकृत्य चिन्तनं कुर्मः तर्हि छात्रजीवने अध्ययनातिरिक्तं सर्वेऽपि प्रत्यक्षाः भौतिकविषयाः 'दृष्टाः' भवन्ति तथा च परीक्षायाः परिणामस्य चिन्ता भयं तथा उत्तीर्णतायाः अनुत्तीर्णतायाः च अनपेक्षितं चिन्तनम् इत्यादयः अप्रत्यक्षरागाः भवन्ति । यस्य छात्रस्य वैराग्यात्मिका वशीकारबुद्धिः सुदृढा भवति । तस्य मनः अध्ययनातिरिक्तेषु प्रत्यक्ष-अप्रत्यक्षविषयेषु आसक्तं न भवति । स च एकाग्रचित्तेन अध्ययन-सम्पादने समर्थः भवति । एवं प्रकारेण सात्त्विकबुद्धेः चतुर्षु भेदेषु त्रयाणां धर्मज्ञानवैराग्याणां विवरणं सम्पन्नं भवति । इदानीं चतुर्थस्य भेदस्य विश्लेषणं क्रियते । ऐश्वर्यम् इति सात्त्विकबुद्धेः चतुर्थः भेदः वर्तते ।

- **'ऐश्वर्यमपि बुद्धिधर्मः, यतोऽणिमादिप्रादुर्भावः'**[34] अस्य अयम् अभिप्रायः वर्तते यत् धर्म-ज्ञान-वैराग्यबुद्धेः विकासोपरान्तं सात्त्विकबुद्धौः ऐश्वर्यधर्मः अथवा गुणः उत्पद्यते । अनया ऐश्वर्यबुद्धिना अष्टसिद्धानां साधनं क्रियते । शैक्षिकसंदर्भे इतोऽपि स्पष्टतया कथयामः तर्हि अस्याः ऐश्वर्यबुद्धेः अणिमा, लघिमा, गरिमा, महिमा, प्राप्तिः, प्राकाम्यम्, वशित्वम्, ईशत्वं चेति अष्टौ गुणाः सिद्धयः वा वर्तन्ते । वस्तुतः साङ्ख्यदर्शने एताः सिद्धयः साधकानां सन्दर्भे प्रतिपादिताः

[31] साङ्ख्यतत्त्वकौमुदी २३
[32] साङ्ख्यतत्त्वकौमुदी २३
[33] योगसूत्रम् १/१५
[34] साङ्ख्यतत्त्वकौमुदी २३

सन्ति । एताः सिद्धयः साधकेषु अद्भुतं सामर्थ्यम् उत्पादयन्ति । परन्तु अत्र वयं शैक्षिकसन्दर्भे एव एतेषां भावाभिज्ञानं करिष्यामः ।

- **अणिमा - 'तत्राणिमा अणुभावः, यतः शिलामपि प्रविशति ।'**[35] अस्य शैक्षिकं भावम् इत्थं भवति यत् अणुभावः अर्थात् सूक्ष्मता इति सूक्ष्मता बुद्धेः कश्चन गुणः वर्तते । अनेन गुणेन युक्तस्य छात्रस्य बुद्धिः विषयेषु सूक्ष्मातिसूक्ष्मतया चिन्तयितुं समर्था भवति । विषयः कियान्नपि जटिलः स्यात् । अणिमागुणेन युक्तस्य छात्रस्य बुद्धिः तस्य विषयस्य प्रतिपक्षम् आद्योपान्तम् सहजतया अवगन्तुम् अवकाशं कल्पयति ।

- **लघिमा – 'लघिमा लघुभावः, यतः सूर्यमरीचीनालम्ब्य सूर्यलोकं याति ।'**[36] लघुभावः अर्थात् भारहीनः इति बहुधा अनुभूतम् अस्ति यत् विषयः सरलः भवेत् जटिलो वा । विषयप्रवेशेनैव बुद्धेः अवरोधः जायते । तथा च चिन्तनक्षमतायाः विचाराणां वा अभावः अनुभूयते । लघिमागुणेन युक्तस्य छात्रस्य बुद्धिः सर्वेषु विषयेषु भारहीना भूत्वा वायुरिव प्रवहति ।

- **गरिमा –'गरिमा गुरुभावः, यतः गुरुर्भवति'**[37] अर्थात् ज्ञानभारेण युक्तः इति । अनुभूतं सत्यम् इदं यत् केचन विषयाः अत्यन्तं भ्रामकाः भवन्ति, तत्र खलु यथार्थस्य निर्धारणम् अत्यन्तं जटिलं भवति । एतादृशेषु विषयेषु प्रवृत्तायाः बुद्धेः गुरुत्वाभावे अथवा ज्ञानभाराभावे बुद्धिः, विषयस्य भ्रमजाले आपतति । अतः यस्य छात्रस्य बुद्धिः ज्ञानगुरुत्वेन युक्ता भवति तस्य बुद्धिः स्थिरा भवति । स च कस्यचिदपि भ्रामकविषयस्य यथार्थनिर्धारणे समर्थः भवति ।

- **महिमा – 'महिमा महतो भावः, यतो महान् भवति ।'**[38] विशालत्वम् इत्यपि अस्य अभिप्रायः भवति । केचन विषयाः अत्यन्तं विशालाः तथा विविधसन्दर्भैः तार्किकरूपेण सहसम्बद्धाः अपि भवन्ति । बुद्धेः विशालत्वगुणाभावे एतादृशानां महद्विषयाणां यथार्थनिर्धारणम् जटिलं भवति । यतो हि एतादृशेषु विषयेषु बुद्धेः आद्योपान्तं स्थिरता न भवति । तथा विविधसन्दर्भैः सह सहसम्बद्धस्य संस्थापनम् अपि जटिलमेव भवति । परन्तु यस्य छात्रस्य बुद्धिः महिमागुणेन युक्ता भवति । सः विशालातिविशालमपि विषयम् आद्योपान्तम् अधिगच्छति । तथा विविधैः सन्दर्भैः विषयस्य सहसम्बन्धात्मकं विश्लेषणं कर्तुम् अपि समर्थः भवति ।

- **प्राप्तिः – 'यतोऽङ्गुल्यग्रेण स्पृशति चन्द्रमसम् ।'** [39] चन्द्रस्पर्शनं सर्वथा जटिलं असाध्यं लक्ष्यम् इति स्पष्टमेव । कथनस्य अयम् आशयः यत् बुद्धेः 'प्राप्तिः' इत्यनेन गुणेन असाध्यस्य लक्ष्यस्य निर्धारणं कृत्वा सरलतया तत्

---
[35] साङ्ख्यतत्त्वकौमुदी २३
[36] तत्रैव
[37] तत्रैव
[38] साङ्ख्यतत्त्वकौमुदी २३
[39] तत्रैव

साधयितुं शक्यते । शैक्षिकसन्दर्भे तु गणितस्य असाध्यसिद्धान्ताः, विज्ञानस्य अनुत्तरिताः प्रश्नाः विशिष्य संस्कृतभाषायाः सन्दर्भे असम्पादितासु पाण्डुलिपिसु निहितानि तत्त्वानि इत्यादयाः विषयाः चन्द्रस्पर्शनमिव जटिलाः भवति । परन्तु यस्य छात्रस्य बुद्धिः 'प्राप्तिः' इत्यनेन गुणेन युक्ता भवति । सः एतादृशानाम् असाध्यसिद्धान्तानां समाधानं, अनुत्तरितप्रश्नानाम् उत्तराणि तथा च असम्पादितासु पाण्डुलिपिसु निहिततत्त्वानाम् अन्वेषणं सहजतया कर्तुं समर्थः भवति ।

○ **प्राकाम्यम् – 'प्राकाम्यम् इच्छानभिघातः, यतो भूमावुन्मज्जयति निमज्जति च, यथोदके '** [40] प्राकाम्यमित्यस्य गुणस्य तात्पर्यम् इच्छायाः प्राबल्येन अस्ति । अर्थात् बुद्धेः प्राकाम्यगुणेन युक्तस्य जनस्य इच्छा अत्यन्तं दृढा भवति । व्याख्यायाम् उक्तं यत् अनेन गुणेन युक्तः जनः स्वस्य इच्छाशक्त्या भूमौ तरणं कर्तुम् अर्हति । तदर्थं भूमौः जलवदाचरति । कथनस्य अभिप्रायः अस्ति यत् बुद्धेः प्राकाम्यगुणेन युक्तस्य जनस्य इच्छायां सत्यां परिस्थितयः वातावरणं पदार्थाः सर्वेऽपि तदनुकूलाः भवन्ति । शैक्षिकं तत्त्वम् इदं वर्तते यत् बुद्धेः प्राकाम्यगुणेन युक्तः छात्रः यदि कमपि विषयं पठितुम् इच्छति तर्हि सः विषयः तस्मैः अत्यन्तं सरलः अनुभूयते । तस्य अध्ययने किमपि बौद्धिकं व्यवधानं न भवतीति ।

○ **वशित्वम् – 'वशित्वम्, यतो भूतभौतिकं वशीभवत्यवश्यम् ।'** [41] वशित्वं बुद्धेः एतादृशः गुणः वर्तते । येन सर्वेऽपि वशीभूताः भवन्ति । अनेन गुणेन सम्पन्नाः बुद्धिमन्तः छात्राः न केवलं स्वगृहे अपितु विद्यालये अपि सर्वेषां प्रियाः भवन्ति । यतो हि वशित्वगुणेन युक्ता बुद्धिः छात्रस्य वाक्कौशलस्य, आचरणस्य, कार्यशैल्याः इत्यादीनां व्यक्तित्वगुणानां निरन्तरं परिष्कारे संलग्ना भवति । येन छात्रस्य व्यक्तित्वम् आकर्षकं भवति । न केवलं बौद्धिकरूपेण अपितु शरीरिकरूपेण अपि छात्रस्य व्यक्तित्वं दृढं भवति ।

○ **ईशित्वम् – 'ईशित्वम्, यतो भूतभौतिकानां प्रभवस्थितिलयानामीष्टे । तच्च कामावसायित्वं, सा सत्यसङ्कल्पता, येन यथास्य सङ्कलेपो भवति भूतेषु. तथैव भूतानि भवन्ति । अन्येषां मनुष्याणां निश्चयाः निश्चेतव्यमनुविधीयन्ते, योगिनस्तु निश्चेतव्याः पदार्थाः निश्चयम् ।'**[42] बुद्धेः अनेन गुणेन युक्तः जनः प्रभवस्य अर्थात् उत्पत्तेः अथवा निर्माणस्य, स्थितेः अर्थात् संचालनस्य अथवा नियन्त्रणस्य लयस्य च अर्थात् विनाशस्य शक्त्या सम्पन्नः भवति । अस्मिन् गुणे कामावसायितायाः शक्तिः अपि निहिता भवति । एषा काचित् सङ्कल्पसिद्धेः शक्तिः वर्तते । यदि अनया बुद्धिना सङ्कल्पः अथवा निश्चयः क्रियते तर्हि तेन सङ्कल्पेन सम्बद्धानि तत्त्वानि स्वयमेव अनुकूलानि भवति । शैक्षिकसन्दर्भे बुद्धेः अनेन गुणेन युक्तः छात्रः नूतनानां सिद्धान्तानां प्रतिपादने, तत्त्वानाम् अन्वेषणे पदार्थानां निर्माणे तथा प्रतिष्ठितानां सिद्धान्तानाम् अपि खण्डने समर्थः भवति । यदि

[40] तत्रैव
[41] साङ्ख्यतत्त्वकौमुदी २३
[42] तत्रैव

एतादृशः छात्रः कमपि विषयमाधृत्य सङ्कल्पं करोति। तर्हि एवं भासते यत् तस्य सङ्कल्पस्य संसिद्ध्यर्थं विषयः अत्यन्तम् अनुकूलः संजातः इति।

यदा सात्त्विकबुद्धेः यथाक्रमं विकासः भवति। तदा एव बुद्धौ एते अणिमादयः गुणाः उत्पद्यन्ते। नान्यथा। एतदर्थम् आदौ सात्त्विकबुद्धेः धर्मप्रभेदस्य साधनं करणीयम् बुद्धेः अयं प्रभेदः कर्तव्याकर्तव्यनिर्धारणस्य कौशलं जनयति। किं कर्तव्यमिति विज्ञाय तस्मिन् विषये सम्पूर्णज्ञानस्य सामर्थ्यं सात्त्विकबुद्धेः ज्ञानात्मकप्रभेदेन प्राप्यते। एतदर्थं वैराग्यबुद्धेः यतमानसञ्ज्ञा, व्यतिरेकसञ्ज्ञा, एकेन्द्रियसञ्ज्ञा वशीकारसञ्ज्ञा च अभ्यासबलेन मनसि स्थितानाम् अनपेक्षितविषयाणां समूलं निवारणं कृत्वा मनः एकाग्रं कर्तुं साहाय्यं कुर्वन्ति। मनसः एकाग्रतायाः कारणेन एव सात्त्विकबुद्धेः ऐश्वर्यप्रभेदस्य अणिमादयः अष्टौ गुणाः उत्पद्यन्ते। तथा अभ्यासः अस्याः प्रक्रियायाः मूलाधारः अस्ति इत्यतः वक्तुं शक्यते यत् अभ्यासशालिनी सा बुद्धिरिति।

**सन्दर्भ-ग्रन्थाः :**

1. झळकीकर वामन (टीककर्ता), **काव्यप्रकाशः** मम्मटः, भाण्डारकरप्राच्यविद्यासंशोधनमंदिरम् पुणे १९८३
2. द्विवेदी रेवाप्रसाद (व्याख्या), **अलङ्कारसर्वस्वम्** रुय्यकः, चौखम्बा संस्कृतभवनम्, वाराणसी २००९
3. द्विवेदी शिवप्रसाद (व्याख्या), **अग्निपुराणम्**, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली २००४
4. भट्टाचार्यः (सम्पादकः) **काव्यमीमांसा,** राजशेखरः, प्राच्यविद्यासंस्थानम् बडोदा, १९३४
5. **रघुवंशम्,** कालिदासः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २००१
6. शर्मा ओमप्रकाशशास्त्री, **रीतिकालीन अलंकार साहित्य का शास्त्रीय विवेचन,** हिन्दी साहित्य संसार, दिल्ली १९९५
7. **साहित्यदर्पणम्,** विश्वनाथः चौखम्बा संस्कृतसंस्थानम्, वाराणसी २००१